ब्(ब्र)ह्मन् न० बृंह-मनिन् "बृंहेर्नोऽच्चेति" उणा० नकारस्याकारे ऋतो रत्वम्। १वेदे "तस्मादेतद् ब्रह्म नाम रूपमन्नञ्च जायते स्मृतिः"। "तेन ब्रह्म हृदा" भाग० १।१।१। २तपसि, ३सत्ये ४तत्त्वे यथार्थे अमरः। सर्वगुणातीते विशुद्धे तुरीये ५चित्स्वरूपे च। ६हिरण्यगर्भे ७विप्रे ८ऋत्विग्विशेषे च पु० अमरः। विष्कम्भादिषु पञ्चविंशे ९योगे मेदि०। उज्ज्वलदत्तेन दन्त्योष्ठ्यादित्वेन साधितम् मेदिनीकरेण ओष्ठ्यादित्वेन कीर्त्तनात्तथात्वमपि। ब्रह्म च सच्चिदानन्दात्मकम्। तच्च तस्य स्वरूपलक्षणम्। विवरणानुसारिणस्तु "आनन्दो विषयानुभवो नित्यत्वञ्चेति सन्ति धर्मा अपृथक्त्वेऽपि पृथगिवावभासन्ते" इति तत्रोक्तौ मिथ्याभावः सत्यत्वम् अज्ञानभावश्चित्त्वम्। दुःखाभाव आनन्द इत्याहुः। तेषामभावानाञ्च ब्रह्मरूपाधिकरणे स्थितत्वात् अभावस्याधिकरणस्वरूपतया ब्रह्मरूपत्वमिति। तस्य तटस्थलक्षणञ्च जगज्जन्मस्थितिप्रलयानां प्रत्येकमुपादानप्रत्यक्षचिकीर्षाकृतिमत्त्वं तेन नवलक्षणवत्त्वम्" वेदान्तप०। अतएवोक्तं श्रीधरेण "विश्वसर्गविसर्गादिनवलक्षणलक्षितमिति"। तच्च ब्रह्म द्विविधं निर्गुणं सगुणञ्च। सच्चिदानन्दात्मकस्यैव निर्गुणत्वं जगज्जन्मादिकर्त्तृत्वस्य सगुणत्वम्। जाग्रदाद्यवस्थात्रयसाक्षिणश्च सगुणत्वं अवस्थात्रयातीतस्य चतुरीयसंज्ञा "शिवमद्वैतं चतुर्थं मन्यन्ते" इति श्रुतेस्तथात्वम्। तत्र तस्य तटस्थलक्षणाभिप्रायेण "जन्माद्यस्य यतः" शा० सू० "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति तज्जिज्ञासस्व ब्रह्मेति" श्रुतिश्च प्रवृत्ते तस्य स्वरूपलक्षणाभिप्रायेण "निर्गुणं निष्कलं शान्तं निरवद्यं निरञ्जनम्" इत्याद्याः श्रुतयः प्रवृत्ताः। आत्मबोधे तु तस्य ब्रह्मणोऽखिलवस्त्वपेक्षया श्रेष्ठत्वाद्ब्रह्मत्वमुक्तं यथा

"यल्लाभान्नापरो लाभो यत्सुखान्नापरं सुखम्। यज्ज्ञानान्नापरं ज्ञानं तद्ब्रह्मेत्यवधारयेत्। यद् दृष्ट्वा नापरं दृश्यं यद्भूत्वा न पुनर्भवः। यज्ज्ञात्वा नापरं ज्ञेयं तद्ब्रह्मेत्यवधारयेत्। तिर्य्यगूर्द्ध्वमधः पूर्णं सच्चिदानन्दमद्वयम्। अनन्तं नित्यमेकं यत्तद्ब्रह्मेत्यवधारयेत्। अतद्व्यावृत्तिरूपेण वेदान्तैर्लक्ष्यतेऽद्वयम्। अखण्डानन्दमेकं यत् तद्ब्रह्मेत्यवधारयेत्। दृश्यते श्रूयते यद्यद्ब्रह्मणोऽन्यन्न तद्भवेत्। तत्त्वज्ञानाच्च तद्ब्रह्म सच्चिदानन्दमद्वयम्। सर्वगं सच्चिदात्मानं ज्ञानचक्षुर्निरीक्षते। अज्ञानचक्षुर्नेक्षेत भास्वन्तं भानुमन्धवत्"। तच्च निर्गुणमपि गुणभेदेन नानारूपं यथोक्तम् "ब्रह्मैकं मूर्त्तिभेदस्तु गुणभेदेन सन्ततम्। तद्ब्रह्म द्विविधं वस्तु सगुणं निर्गुणं शिव!। मायाश्रितो यः सगुणो मायातीतश्च निर्गुणः। स्वेच्छामयश्च भगवानिच्छया विकरोति च। इच्छाशक्तिश्च प्रकृतिः सर्वशक्तिप्रसूः सदा। केचिदेकं वदन्त्येवं ब्रह्म ज्योतिः सनातनम्। केचिद्वदन्ति द्विविधं ब्रह्मप्रकृतिपूर्वकम्। शृणु ये च वदन्त्येकं प्रकृतिपुरुषयोः परम्। तस्माद्भवति तौ द्वौ च तद्ब्रह्म सर्वकारणम्"। अथवैकं परं ब्रह्म द्विविधं भवतीच्छया। इच्छाशक्तिश्च प्रकृतिः सर्वशक्तिप्रसूः सदा" ब्रह्मवैवर्त्ते जन्मख० ४२ अ०। तस्य नवधा रूपं यथा "योगिनो यं वदन्त्येवं ज्योतीरूपं सनातनम्१। ज्योतिरभ्यन्तरे नित्यरूपं२ भक्ता वदन्ति यम्। वेदा वदन्ति सत्यं३ यं नित्यमाद्यं४ विचक्षणाः। यं वदन्ति सुराः सर्वे परं स्वेच्छामयं प्रभुम्५। सिद्धेन्द्रा मुनयः सर्वे सर्वरूपं६ वदन्ति यम्। यमनिर्वचनीयञ्च योगीन्द्रः शङ्करो वदेत्७। स्वयं धाता च प्रवदेत् कारणानाञ्च कारणम्८। शेषो वदेदनन्तं९ यं नवधारूपमीश्वरम्। तर्काणामेव षण्णां यं षड्विधं रूपमीश्वरम्। वैष्णवानामेकरूपं वेदानामेकमेव च। पुराणानामेकरूपं तस्मान्नवविधं स्मृतम्। न्यायो निर्वचनीयञ्च यन्मतं शङ्करोऽब्रवीत्। नित्यं वैशेषिकास्त्वन्यं वदन्ति च विचक्षणाः। सांख्यो वदति तं देवं ज्योतीरूपं सनातनम्। मीमांसा सर्वरूपञ्च वेदान्तः सर्वकारणम्। पातञ्जलोऽप्यनन्तञ्च वेदाः सत्यस्वरूपकम्। स्वेच्छामयं पुराणञ्च भक्ताश्च नित्यविग्रहम्" इति तत्रैव १२८अ०। अन्यथाऽपि सत्त्वादिगुणभेदेन तस्य चतुर्धारूपं यथा "चतुर्विभागः संसृष्टौ चतुर्धा संस्थितः स्थितौ। प्रलयञ्च करोत्यन्ते चतुर्भेदो जनार्दनः। एकेनांशेन ब्रह्माऽसौ भवत्यव्यक्तमूर्त्तिमान्। मरीचिमिश्राः पतयः प्रजानामन्यभागतः। कालस्तृतीयस्तस्यांशः सर्वभूतानि चापरः। इत्थं चतुर्धा संसृष्टौ वर्त्ततेऽसौ रजोगुणः। एकांशेन स्थितो विष्णुः करोति परिपालनम्। मन्वादिरूपी चान्येन कालरूपी परेण च। सर्वभूतेषु चान्येन संस्थितिं कुरुते स्थितः। सत्त्वं गुणमुपाश्रित्य जगतः पुरुषोत्तमः। आश्रित्य तमसो वृत्तिमन्तकाले तथा प्रभुः। रुद्रस्वरूपो भगवानेकांशेन भवत्यजः। अग्न्यन्तकादिरूपेण भागेनान्येन वर्त्तते।